"हृतशातकुम्भनिभमंशुमतो
वपुरर्द्धमग्नवपुषः पयसि ॥")
धुस्तूरः । इत्यमरः ॥
शातकुम्भः, पुं, करवीरवृक्षः । इति मेदिनी ॥
शातकौम्भं, क्ली, स्वर्णम् । इति भरतद्विरूपकोषः ॥
( सुवर्णनिर्म्मिते, त्रि । यथा, रामायणे । २ । ३ । ११ ।
"शतञ्च शातकौम्भानां कुम्भानामग्निवर्च्चसाम् ॥")
शातनं, क्ली, तात्क्ष्ण्यम् । विनाशनम् । यथा,—
"वसन्ते सर्व्वशस्यानां जायते पत्रशातनम् ।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥"
इति सारमञ्जरी ॥
( छेदके, त्रि । यथा, रघुः । ३ । ४२ ।
"स पूर्व्वजः पर्व्वतपक्षशातनं
ददर्श देवं नरदेवसम्भवः ॥" )
शातपत्त्रकः, पुं, ( शातपत्त्रं पद्ममिव । कन् । ) चन्द्रप्रकाशः । यथा,—
"चन्द्रिका कौमुदी ज्योत्स्ना प्रकाशो द्योत आतपः ।
अकलङ्का चन्द्रिकायाश्च प्रकाशे शातपत्त्रकः ॥"
इति शब्दचन्द्रिका ॥
शातभीरुः, पुं, मदनमाली । मल्लिकाभेदः । यथा,—
"शातभीरुर्भवेद्वल्ली भूमिमल्लोऽल्पपादिका ॥"
इति रत्नमाला ॥
शातमानं, त्रि, ( शतमान + "शतमानविंशतिकेति ।" ५ । १ । २७ । इति अण् । ) शतमानेन क्रीतम् । इति सिद्धान्तकौमुदी ॥
शातला, स्त्री, (शातं छेदं लातीति । ला + कः ।) सातला । चर्म्मकषा इति ख्याता । इत्यमरटीकायां भरतः ॥
शात्रवं, क्ली, ( शात्रोर्भावः समूहो वा । शत्रु + अण् । ) शत्रुभावः । शत्रुसंहतिः । इति मेदिनी ॥ ( शत्रुसम्बन्धिनि, त्रि । यथा, रघुः । ४ । ४२ ।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवञ्च पपुर्य्यशः ॥" )
शात्रवः, पुं, ( शत्रुरेव । स्वार्थे अण् । ) शत्रुः । इत्यमरः ॥ ( यथा, माघे । १४ । ४४ ।
"तत्र नाभवदसौ महाहवे
शात्रवादिव पराङ्मुखोऽर्थिनः ॥" )
शादः, पुं, (शो तनूकरणे + "शाशपिभ्यां ददनौ ।" उणा० ४ । ९७ । इति दः ।) कर्द्दमः । शष्पम् । इत्यमरः ॥
शादहरितः, त्रि, ( शादैः शष्पैः हरितः । ) शाद्वलः । इत्यमरः ॥
शाद्वलः, त्रि, ( शाद + "नडशादात् ड्वलच् ।" ४ । २ । ८८ । इति ड्वलच् । ) नवतृणबहुलदेशः । इत्यमरः ॥ शादो नवतृणं विद्यतेऽत्र शाद्वलः । शष्पवाचिन एव शादशब्दाद्वलः स्यात् न तु पङ्कवाचिनोऽनभिधानात् । इति तट्टीकायां भरतः ॥ ( यथा, रामायणे । २ । ३० । २४ ।
"शाद्वलेषु यदा शिश्ये वनान्ते वनगोचरा ।
कुथास्तरणयुक्तेषु किं स्यात् सुखतरं ततः ॥")
शान, ऋ तेजे । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०- सेट् । ) शानस्तीक्ष्णीकरणम् । ऋ, शीशांसति शीशांसते खड्गं कर्म्मकारः । इति दुर्गादासः ॥
शानः, पुं, शाणः । इत्यमरटीकायां भरतः ॥
शा(णा)नपादः, पुं, पारियात्रपर्व्वतः । ( अस्य विवरणं हरिवंशे १३१ अध्याये द्रष्टव्यम् ॥ ) चन्दनघर्षणपाषाणः । इति महाभारते हरिवंशः ॥ चन्दनपिंडि इति भाषा ॥
शानी, स्त्री, इन्द्रवारुणी । इति शब्दचन्द्रिका ॥
शान्तः, त्रि, ( शम + क्तः । "वा दान्तशान्तेति ।" ७ । २ । २७ । इति निपातितः । ) उपशमं प्रापितः । प्राप्तोपशमः । इति भरतः ॥ तत्पर्य्यायः । शमितः २ । इत्यमरः ॥ श्रान्तः ३ जितेन्द्रियः ४ । इति हेमचन्द्रः ॥ शमान्वितः ५ । इति मेदिनी ॥
शान्तः, पुं, अभियुक्तः । रसभेदः । इति मेदिनी ॥ शान्तरसस्य लक्षणादि यथा,—
"शान्तः शमः स्थायिभाव उत्तमप्रकृतिर्म्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ॥
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ।
निर्व्वेदहर्षस्मरणमतिभूतदयादयः ॥"
यथा, -
"रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासञ्च सकौतुकञ्च सदयं दृष्टस्य तैर्नागरैः ।
निर्व्याजीकृतचित्सुधारससुदा निद्रायमाणस्य मे
निःशङ्कं करटः कदा करपुटी भिक्षां विलुण्ठिष्यति ॥"
पुष्टिस्तु महाभारतादौ द्रष्टव्या ।
"निरहङ्काररूपत्वात् दयावीरादिरेष नो ।"
दयावीरादौ हि जीमूतवाहनादौ अन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्यप्राप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते । शान्तस्तु सर्व्वप्रकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति । अतश्च नागानन्दे शान्तरसप्रधानत्वमपास्तम् । ननु ।
"न यत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः
सर्व्वेषु भावेषु समप्रमाणः ॥"
इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात् । तत्र सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः रसतामेति तदस्मिन् सञ्चार्य्यादेः स्थितिश्च न विरुद्धा । यश्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः । उक्तं हि ।
"यच्च कामसुखं लोके यच्च दिव्यं महासुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥
सर्व्वाकारमहङ्काररहितत्वं व्रजन्ति चेत् ।
अत्रान्तर्भावमर्हन्ति दयावीरादयस्तदा ॥"
आदिशब्दात् धर्म्मवीरदानवीरदेवताविषयरतिप्रभृतयः । तत्र देवताविषया रतिर्य्यथा,—
"कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥"
इति साहित्यदर्पणे ३ परिच्छेदः ॥
शान्तं, [ म् ] व, वारणम् । इति मेदिनी ॥
शान्तनवः, पुं, (शान्तनोरपत्यं पुमान् । शान्तनु + अण् । ) शान्तनुराजपुत्त्रः । भीष्मः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ३६ । ९० ।
"तथा भीष्मः शान्तनवो गङ्गायाममितद्युतिः ।
वसुवीर्य्यात् समभवत् महावीर्य्यो महायशाः ॥")
शान्तनुः, पुं, द्वापरयुगस्य चन्द्रवंशीयैकविंशराजः । स तु गङ्गायां भीष्मं जनयामास । तस्य पिता प्रतीपः । यथा,—
"जयसेनस्तत्तनयो राधिकोऽतोऽयुतायुभूत् ।
ततश्चाक्रोधनस्तस्मात् देवातिथिरमुष्य च ॥
ऋक्षस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः ।
देवापिः शान्तनुस्तस्य वाह्लीक इति चात्मजाः ॥
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेव्यति ।
शान्तिमाप्नोति चैवाग्र्यां कर्म्मणा तेन शान्तनुः ॥
वाह्लीकात् सोमदत्तोऽभूत् भूरिर्भूरिश्रवास्ततः ।
शलश्च शान्तनोरासीत् गङ्गायां भीष्म आत्मवान् ॥"
इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥
तत्पर्य्यायः । महाभीष्मः २ । इति जटाधरः ॥ प्रातीपः ३ । इति त्रिकाण्डशेषः ॥ प्रतीपः ४ प्रतिपः ५ । इति शब्दरत्नावली ॥ ( शन्तनुरिति पाठस्तु बहुभिराहतः ॥ ) कर्कटी । इति रत्नमाला ॥
शान्ता, स्त्री, दशरथराजकन्या । दशरथेन कन्यार्थं लोमपादाय राज्ञे प्रदत्ता । सा च ऋष्यशृङ्गभार्य्या । इति रामायणम् ॥ ( यथा, उत्तरचरिते १ अङ्के ।
"कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥")
शमीभेदः । तत्पर्य्यायः । शुभा २ भद्रा ३ अपराजिता ४ जया ५ विजया ६ । अस्या गुणाः शमीवत् । इति राजनिर्घण्टः ॥
शान्तिः, स्त्री, ( शम + क्तिन् । ) कामक्रोधादिप्रशमः । चित्तोपशमः । इति भरतः ॥ विषयेभ्य